## पादः पत् । (१३०/४१४)

पादः इति पादशब्दो लुप्ताकारो गृह्यते । तदन्तस्याङ्गस्य भस्य पत् इत्ययमादेशो [1]भवति । स च 'निर्दिश्यमानस्यादेशा भवन्ति' (व्या. प. १०६) इति पाच्छब्दस्यैव भवति, न तदन्तस्य सर्वस्य । द्विपदः पश्य[2] । द्विपदा[3] । द्विपदे । द्विपदिकां ददाति । त्रिपदिकां ददाति । वैयाघ्रपद्यः ॥

## वसोः सम्प्रसारणम् । (१३१/४३८)

वस्वन्तस्य भस्य सम्प्रसारणं भवति । विदुषः पश्य । विदुषा । विदुषे । पेचुषः पश्य । पेचुषा । पेचुषे । [4]पपुषः पश्य । आकारलोपे कर्तव्ये [5]वसुसंप्रसारणस्य व्याश्रयत्वादसिद्धत्वं न भवति[6] । [7]वसुग्रहणे क्वसोरपि ग्रहणमिष्यते ॥

## वाह ऊठ् । (१३२/३२०)

वाहः इत्येवमन्तस्य भस्य ऊठ् इत्येतत् सम्प्रसारणं [8]भवति । प्रष्ठौहः । प्रष्ठौहा । प्रष्ठौहे । दित्यौहः । दित्यौहा । दित्यौहे । 'एत्येधत्यूठ्सु' (६. १. ८९/७३) इति वृद्धिः । अथ किमर्थमूठ् क्रियते, सम्प्रसारणे एव कृते गुणे च 'वृद्धिरेचि' (६. १. ८८/७२) इति वृद्धौ [9]सत्यां सिद्धं रूपं भवति प्रष्ठौहः इति, अनकारान्ते चोपपदे वहे[10]र्ण्विर्न दृश्यते ? ज्ञापनार्थम् । एतज् ज्ञापयति, भवत्येषा परिभाषा[11] 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या. प. ४२) इति । तस्यां हि सत्यां बहिरङ्गस्य सम्प्रसारणस्य असिद्धत्वात् अन्तरङ्गो गुणो न स्यात् ॥

## श्वयुवमघोनामतद्धिते । (१३३/३६२)

श्वन् युवन् मघवन् इत्येतेषाम् [12]अङ्गानामतद्धिते प्रत्यये परतः सम्प्रसारणं भवति । शुनः[13] । शुना । शुने । यूनः[14] । यूना । यूने । मघोनः[15] । मघोना । मघोने । अतद्धिते इति किम् ? [16]शौवं मांसम् । यौवनं वर्तते । माघवनः स्थालीपाकः । शुनो विकारे 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४/१५३२), द्वारादित्वादैजागमः । श्वादीनामेतत् सम्प्रसारणं [17]नकारान्तानामिष्यते । इह न भवति, युवतीः पश्य । मघवतः । मघवता[18] । मघवते । तदर्थमुत्तरत्र योगविभागं कुर्वन्ति । अल्लोपः । अनः । अनः इत्युभयोः शेषः [19]इति ॥

## अल्लोपोऽनः । (१३४/२३४)

[20]अन् इत्येवमन्तस्य भस्य अकारलोपो भवति । राज्ञः पश्य । राज्ञा । राज्ञे । [21]तक्ष्णः पश्य । तक्ष्णा । तक्ष्णे । अनो [22]नकारान्तस्यायं लोप इष्यते । इह न भवति, राजकीयम् इति ॥

---

1. भविष्यति फ. 2. त्रिपदः पश्य इत्यधिकम् फ. 3. द्विपदा द्विपदे नास्ति फ. ह. 4. ययुषः पश्य फ. ह. 5. वसोः सम्प्रसारणस्य फ. 6. उकारोच्चारणसामर्थ्यात् इत्यधिकम् ह. 7. वसुसम्प्रसारणे ब. ड. 8. स्यात् फ. 9. कृतायाम् फ. 10. ण्विन् क, ण्विन् प्रत्ययो ह. 11. अस्मिन् प्रकरणे इत्यधिकम् फ. 12. भसञ्ज्ञकानाम् इत्यधिकम् ह. 13–15. पश्य इत्यधिकम् फ. 16 शौवनम् क. फ. 17. नकारान्तस्य फ. 18. इति फ, मघवते नास्ति फ. 19. नास्ति फ. 20. अन्नन्तस्य अङ्गस्य फ. ह. 21. तक्षणः तक्षणा नास्ति क. 22. नकारस्यायम् फ.